प्राप्तो जीविकाम् प्राप्तजीविकः[1]। आपन्नो जीविकाम् आपन्नजीविकः (२.२.४/७१५)। अलं जीविकायै अलंजीविकः (वा. ९३)। गतिसमासः – निष्क्रान्तः कौशाम्ब्याः निष्कौशाम्बिः (वा. ९४)॥

## पूर्ववदश्ववडवौ। (२७/८१३)

अश्ववडवयोर्विभाषैकवद्भावः (२.४.१२/९१६) उक्तः। तत्रैकवद्भावादन्यत्र परवल्लिङ्गतायां प्राप्तायामिदमारभ्यते। अश्ववडवयोः पूर्ववल्लिङ्गं भवति। अश्वश्च वडवा च अश्ववडवौ। [2]अर्थातिदेशश्चायम्, न निपातनम्। तत्र द्विवचनमतन्त्रम्। वचनान्तरेऽपि पूर्ववल्लिङ्गता भवति, अश्ववडवान्, अश्ववडवैः इति॥

## हेमन्तशिशिरावहोरात्रे च छन्दसि। (२८/३३९९)

[3]पूर्ववत् इति वर्तते। [4]हेमन्तशिशिरौ अहोरात्रे इत्येतयोश्छन्दसि विषये पूर्ववल्लिङ्गं भवति। 'हेमन्तशिशिरावृतूनां [5]प्रीणामि' (तै.सं. १.६.२.३)। 'अहोरात्रे इदं ब्रूमः' (अ.वे. ११६.५)। [6]परवल्लिङ्गतापवादो योगः। अर्थातिदेशश्चायं न निपातनं, तेन द्विवचनमतन्त्रम्। [7]वचनान्तरेऽपि पूर्ववल्लिङ्गता भवति। [8]पूर्वपक्षाश्चितयः। अपरपक्षाः पुरीषम्, अहोरात्राणीष्टकाः (तै.ब्रा. ३.११.४.१)। छन्दसि इति किम्? दुःखे[9] हेमन्तशिशिरे। अहोरात्राविमौ पुण्यौ। छन्दसि लिङ्गव्यत्यय उक्तः, तस्यैवायं[10] प्रपञ्चः॥

## रात्राह्नाहाः पुंसि। (२९/८१४)

कृतसमासान्तानां निर्देशः। रात्र अह्न अह [11]इत्येते पुंसि भाष्यन्ते। परवल्लिङ्गतया [12]स्त्रीनपुंसकयोः प्राप्तयोरिदं वचनम्। द्विरात्रः। त्रिरात्रः। [13]चतूरात्रः। पूर्वाह्णः। अपराह्णः। [14]मध्याह्नः। द्व्यहः। त्र्यहः।

[१६४] अनुवाकादयः [15]पुंसीति वक्तव्यम्। (म.भा. १.४७९)

अनुवाकः। शंयुवाकः (आश्व.श्रौ. १.१०.११)। [16]सूक्तवाकः (ऋ. १०.८८.७)॥

## अपथं नपुंसकम्। (३०/८१५)

अपथशब्दो नपुंसकलिङ्गो भवति। अपथमिदम्। अपथानि गाहते मूढः। इह कस्मान्न भवति, [17]अपथो देशः, अपथा [18]नगरी? [19]तत्पुरुषः इति वर्तते॥

## अर्धर्चाः पुंसि च। (३१/८१६)

अर्धर्चादयः शब्दाः पुंसि नपुंसके च भाष्यन्ते। अर्धर्चः (तै.सं. ६.३.११.३)। अर्धर्चम् (तै.सं. २.५.७.४.)। गोमयः (ऋ. १०.६२.२)। गोमयम् (श. १२.९.२.३)।

---

1. मासजीवितः इत्यधिकम् ब. 2. अर्थाति – भवति नास्ति फ. 3. वाक्यमिदं नास्ति ब. 4. हेमन्तशिशिरौअहोरात्र क.ड.फ, नास्ति ब. 5. प्रीणाति ड.इ. 6. परलिङ्गापवादः क. 7. वाक्यमिदं नास्ति ड.फ. 8. पूर्वपक्षाश्रितः। अपरपक्षाश्रितः ड. 9. न इत्यधिकम् क. 10. अयं नास्ति फ. 11. इत्येवमन्ताः ड. 12. स्त्रीनपुंसकलिङ्गे प्राप्ते फ. 13. नास्ति इ.फ.ह. 14. नास्ति फ.ह. 15. पुंसि वक्तव्याः क. ड. इ. 16. नास्ति ड. 17. अपथोऽह्नेर्देशः ब. 18. नदी ह. 19. इत्यधिकारात् ह.